# gaNeshakRitam shrIrAdhAstavanam

# શ્રીરાધાસ્તવનં ગણેશકૃતમ્

## Document Information

Text title : gaNeshakRitam shrIrAdhAstavanam

File name : rAdhAgaNesha.itx

Category : devii, radha, stotra, devI

Location : doc_devii

Transliterated by : Daniel Mohanpersad danielmohanpersad98 at msn.com

Proofread by : Daniel Mohanpersad danielmohanpersad98 at msn.com

Translated by : -

Latest update : June 26, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# શ્રીરાધાસ્તવનં ગણેશકૃતમ્

શ્રીગણેશ ઉવાચ ।
તવ પૂજા જગન્માતર્લોકશિક્ષાકરી શુભે।
બ્રહ્મસ્વરૂપા ભવતી કૃષ્ણવક્ષઃસ્થલસ્થિતા ॥ ૧॥

યત્પાદપદ્મમતુતલં ધ્યાયન્તે તે સુદુર્લભમ્ ।
સુરા બ્રહ્મેશશેષાદ્યા મુનીન્દ્રાઃ સનકાદયઃ ॥ ૨॥

જિવન્મુક્તાશ્ચ  ભક્તાશ્ચ સિદ્ધેન્દ્રાઃ કપિલાદયઃ ।
તસ્ય પ્રાણાભિદેવિ  ત્વં પ્રિયા પ્રાનાધિકા પરા ॥ ૩॥

વામાઙ્ગનિર્મિતા રાધા દક્ષિણાઙ્ગશ્ચ માધવઃ ।
મહાલક્ષ્મીર્જગન્માતા તવ વામાઙ્ગનિર્મિતા ॥ ૪॥

વસોઃ સર્વનિવાસસ્ય પ્રસૂસ્ત્વં પરમેશ્વરી ।
વેદાનાં જગતામેવ મૂલપ્રકૃતિરીશ્વરી ॥ ૫॥

સર્વાઃ પ્રકૃતિકા માતઃ સૃષ્ટ્યાં ચ ત્વદ્વિભૂતયઃ ।
વિશ્વાનિ કાર્યરૂપાણિ ત્વં ચ કારણરૂપિણી ॥ ૬॥

પ્રલયે બ્રહ્મણઃ પાતે તન્નિમેષો હરેરપિ ।
આદૌ રાધાં સમુચ્ચાર્ય પશ્ચાત્ કૃષ્ણં પરાત્પરમ્ ॥ ૭॥

સ એવ પણ્ડિતો યોગી  ગોલોકં યાતિ લીલયા ।
વ્યતિક્રમે મહાપી બ્રહ્મહત્યાં લભેદ્ ધ્રુવમ્ ॥ ૮॥

જગતાં ભવતી માતા પરમાત્મા પિતા હરિઃ ।
પિતુરેવ ગુરુર્માતા પૂજ્યા વન્દ્યા પરત્પરા ॥ ૯॥

ભજતે દેવમન્યં વા કૃષ્ણં વા સર્વકારણમ્ ।
પુણ્યક્ષેત્રે મહામૂઢો યદિ નિન્દા રાધીકામ્ ॥ ૧૦॥

વંશહાનિર્ભવેત્તસ્ય દુઃખશોકમિહૈવ ચ ।

પચ્યતે નિરતે ઘોરે યાવચ્ચન્દ્રદિવાકરૌ ॥ ૧૧॥

ગુરુશ્ચ જ્ઞાનોદ્ગિરણાજ્જ્ઞાનં સ્યાન્મંત્રતંત્રયોઃ ।
સ ચ મન્ત્રશ્ચ તત્તન્ત્રં ભક્તિઃ સ્યાદ્ યુવયોર્યતઃ ॥ ૧૨॥

નિશેવ્ય મન્ત્રં દેવાનાં જીવા જન્મનિ જન્મનિ ।
ભક્તા ભવન્તિ દુર્ગાયાઃ પાદપદ્મે સુદુર્લભે ॥ ૧૩॥

નિષેવ્ય મન્ત્રં શમ્ભોશ્ચ જગતાં કારણસ્ય ચ ।
તદા પ્રાપ્નોતિ યુવયોઃ પાદપદ્મં સુદુર્લભમ્ ॥ ૧૪॥

યુવયોઃ પાદપદ્મં ચ દુર્લભં પ્રાપ્ય પુણ્યવાન્ ।
ક્ષણાર્ધં ષોડશાંશં ચ ન હિ મુઞ્ચતિ દૈવતઃ ॥ ૧૫॥

ભક્ત્યા ચ યુવયોર્મન્ત્રં ગૃહીત્વા વૈષ્ણવાદપિ ।
સ્તવં વા કવચં વાપિ કર્મમૂલનિકૃન્તનમ્ ॥ ૧૬॥

યો જપેત્ પરયા ભક્ત્યા પુણ્યક્ષેત્રે ચ ભારતે ।
પુરુષાણાં સહસ્રં ચ સ્વાત્મના સાર્ધમુદ્ધરેત્ ॥ ૧૭॥

ગુરુમભ્યર્ચ્ય વિધિવદ્ વસ્ત્રાલંકારચન્દનૈઃ ।
કવચં ધારયેદ્ યો હિ વિષ્ણુતુલ્યો ભવેદ્ ધ્રુવમ્ ॥ ૧૮॥

॥ ઇતિ શ્રી બ્રહ્મવૈવર્તે ગણેશકૃતં શ્રીરાધાસ્તવનં
સમ્પૂર્ણમ્ ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

*gaNeshakRitam shrIrAdhAstavanam*

pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*